# dhvanyAlokaH 4

# ધ્વન્યાલોકઃ ૪

## Document Information

Text title : dhvanyaloka udyota 4

File name : dhvanyaloka4.itx

Category : major_works

Location : doc_z_misc_major_works

Transliterated by : Rajani rajni_arjun at yahoo.com

Proofread by : Rajani rajni_arjun at yahoo.com

Latest update : January 4, 2002

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

March 24, 2024

*sanskritdocuments.org*

# ધ્વન્યાલોકઃ ૪

એવં ધ્વનિં સપ્રપઞ્ચં વિપ્રતિપત્તિનિરાસાર્થં વ્યુત્પાદ્ય તદ્વ્યુત્પાદને પ્રયોજનાન્તરમુચ્યતે —

ધ્વનેર્યઃ સગુણીભૂતવ્યઙ્ગ્યસ્યાધ્વા પ્રદર્શિતઃ ।
અનેનાનન્ત્યમાયાતિ કવીનાં પ્રતિભાગુણઃ ॥ ૧॥

ય એષ ધ્વનેર્ગુણીભૂતવ્યઙ્ગ્યસ્ય ચ માર્ગઃ પ્રકાશિતસ્તસ્ય ફલાન્તરં કવિપ્રતિભાનન્ત્યમ્ ।

કથમિતિ ચેત્ —

અતો હ્યન્યતમેનાપિ પ્રકારેણ વિભૂષિતા ।
વાણી નવત્વમાયાતિ પૂર્વાર્થાન્વયવત્યપિ ॥ ૨॥

અતો ધ્વનેરુક્તપ્રભેદમધ્યાદન્યતમેનાપિ પ્રકારેણ વિભૂષિતા સતી વાણી પુરાતનકવિનિબદ્ધાર્થસંસ્પર્શવત્યપિ નવત્વમાયાતિ । તથાહ્યવિવક્ષિતવાચ્યસ્ય ધ્વનેઃ પ્રકારદ્વયસમાશ્રયેણ નવત્વં પૂર્વાર્થાનુગમેઽપિ

યથા —

સ્મિતં કિઞ્ચિન્મુગ્ધં તરલમધુરો દૃષ્ટિવિભવઃ
પરિસ્પન્દો વાચામભિનવવિલાસોર્મિસરસઃ ।
ગતાનામારમ્ભઃ કિસલયિતલીલાપરિમલઃ
સ્પૃશન્ત્યાસ્તારુણ્યં કિમિવ હિ ન રમ્યં મૃગદૃશઃ ॥

ઇત્યસ્ય,

સવિભ્રમસ્મિતોદ્ભેદા લોલાક્ષ્યઃ પ્રસ્ખલદ્ગિરઃ ।
નિતમ્બાલસગામિન્યઃ કામિન્યઃ કસ્ય ન પ્રિયાઃ ॥

ઇત્યેવમાદિષુ શ્લોકેષુ સત્સ્વપિ તિરસ્કૃતવાચ્યધ્વનિસમાશ્રયેણાપૂર્વત્વમેવ પ્રતિભાસતે। તથા —

યઃ પ્રથમઃ પ્રથમઃ સ તુ તથાહિ હતહસ્તિબહલપલલાશી ।
શ્વાપદગણેષુ સિંહઃ સિંહઃ કેનાધરીક્રિયતે ॥

ઇત્યસ્ય,
સ્વતેજઃક્રીતમહિમા કેનાન્યેનાતિશય્યતે ।
મહદ્ભિરપિ માતઙ્ગૈઃ સિંહઃ કિમભિભૂયતે ॥

ઇત્યેવમાદિષુ શ્લોકેષુ સત્સ્વપ્યર્થાન્તરસઙ્ક્રમિતવાચ્યધ્વનિસમાશ્રયેણ નવત્વમ્ । વિવક્ષિતાન્યપરવાચ્યસ્યાપ્યુક્તપ્રકારસમાશ્રયેણ નવત્વં યથા —
નિદ્રાકૈતવિનઃ પ્રિયસ્ય વદને વિન્યસ્ય વક્ત્રં વધૂ-
ર્બોધત્રાસનિરુદ્ધચુમ્બનરસાપ્યાભોગલોલં સ્થિતા ।
વૈલક્ષ્યાદ્વિમુખીભવેદિતિ પુનસ્તસ્યાપ્યનારમ્ભિણઃ
સાકાઙ્ક્ષપ્રતિપત્તિ નામ હૃદયં યાતં તુ પારં રતેઃ ॥

ઇત્યાદેઃ શ્લોકસ્ય,
શૂન્યં વાસગૃહં વિલોક્ય શયનાદુત્થાય કિઞ્ચિચ્છનૈ-
ર્નિદ્રાવ્યાજમુપાગતસ્ય સુચિરં નિર્વર્ણ્ય પત્યુર્મુખમ્ ।
વિસ્રબ્ધં પરિચુમ્બ્ય જાતપુલકામાલોક્ય ગણ્ડસ્થલીં
લજ્જાનમ્રમુખી પ્રિયેણ હસતા બાલા ચિરં ચુમ્બિતા ॥

ઇત્યાદિષુ શ્લોકેષુ સત્સ્વપિ નવત્વમ્ । યથા વા — તરઙ્ગભ્રૂભઙ્ગા ઇત્યાદિશ્લોકસ્ય નાનાભઙ્ગિભ્રમદ્ભ્રૂઃ ઇત્યાદિશ્લોકાપેક્ષયાન્યત્વમ્ ॥ ૨॥

યુક્ત્યાઽનયાનુસર્તવ્યો રસાદિર્બહુવિસ્તરઃ ।
મિથોઽપ્યનન્તતાં પ્રાપ્તઃ કાવ્યમાર્ગો યદાશ્રયાત્ ॥ ૩॥

બહુવિસ્તારોઽયં રસભાવતદાભાસતત્પ્રશમલક્ષણો માર્ગો યથાસ્વં વિભાવાનુભાવપ્રભેદકલનયા યથોક્તં પ્રાક્ । સ સર્વ એવાનયા યુક્ત્યાનુસર્તવ્યઃ । યસ્ય રસાદેરાશ્રયાદયં કાવ્યમાર્ગઃ પુરાતનૈઃ કવિભિઃ સહસ્રસંખ્યૈરસંખ્યૈર્વા બહુપ્રકારં ક્ષુણ્ણત્વાન્મિતોઽપ્યનન્તતામેતિ । રસભાવાદીનાં હિ પ્રત્યેકં વિભાવાનુભાવવ્યભિચારિસમાશ્રયાદપરિમિતત્વમ્ । તેષાં ચૈકૈકપ્રભેદાપેક્ષયાપિ તાવજ્જગદ્વૃત્તમુપનિબધ્યમાનં સુકવિભિસ્તદિચ્છાવશાદન્યથા સ્થિતમપ્યન્યથૈવ વિવર્તતે । પ્રતિપાદિતં ચૈતચ્ચિત્રવિચારાવસરે । ગાથા ચાત્ર કૃતૈવ મહાકવિના —
અતથાસ્થિતાનપિ તથાસંસ્થિતાનિવ હૃદયે યા નિવેશયતિ ।
અર્થવિશેષાન્ સા જયતિ વિકટકવિગોચરા વાણી ॥

તદિત્થં રસભાવાદ્યાશ્રયેણ કાવ્યાર્થાનામાનન્ત્યં સુપ્રતિપાદિતમ્ ।

એતદેવોપપાદયિતુમુચ્યતે —
દૃષ્ટપૂર્વા અપિ હ્યર્થાઃ કાવ્યે રસપરિગ્રહાત્ ।
સર્વે નવા ઇવાભાન્તિ મધુમાસ ઇવ દ્રુમાઃ ॥ ૪॥

તથા હિ વિવક્ષિતાન્યપરવાચ્યસ્યૈવ શબ્દશક્ત્યુદ્ભવાનુરણન-રૂપવ્યઙ્ગ્યપ્રકારસમાશ્રયેણ નવત્વમ્ । યથા — ધરણીધારણાયાધુના ત્વં શેષઃ ઇત્યાદેઃ ।
શેષો હિમગિરિસ્ત્વં ચ મહાન્તો ગુરવઃ સ્થિરાઃ ।
યદલઙ્ઘિતમર્યાદાશ્ચલન્તીં બિભ્રતે ભુવમ્ ॥

ઇત્યાદિષુ સત્સ્વપિ । તસ્યૈવાર્થશક્ત્યુદ્ભવાનુરણનરૂપવ્યઙ્ગ્યસમાશ્ર-યેણ નવત્વમ્ । યથા — એવંવાદિનિ દેવર્ષૌ ઇત્યાદિ શ્લોકસ્ય ।
કૃતે વરકથાલાપે કુમાર્યઃ પુલકોદ્ગમૈઃ ।
સૂચયન્તિ સ્પૃહામન્તર્લજ્જયાવનતાનનાઃ ॥

ઇત્યાદિષુ સત્સુ અર્થશક્ત્યુદ્ભવાનુરણનરૂપવ્યઙ્ગ્યસ્ય કવિપ્રૌઢો-ક્તિનિર્મિતશરીરત્વેન નવત્વમ્ । યથા — સજ્જયતિ સુરભિમાસો ઇત્યાદેઃ ।
સુરભિસમયે પ્રવૃત્તે સહસા પ્રાદુર્ભવન્તિ રમણીયાઃ ।
રાગવતામુત્કલિકાઃ સહૈવ સહકારકલિકાભિઃ ॥

ઇત્યાદિષુ સત્સ્વપ્યપૂર્વત્વમેવ ।

અર્થશક્ત્યુદ્ભવાનુરણનરૂપવ્યઙ્ગ્યસ્ય કવિનિબદ્ધવક્તૃપ્રૌઢોક્તિમાત્ર-નિષ્પન્નશરીરત્વેન નવત્વમ્ । યથા 'વાણિજ્ય હસ્તિદન્તાઃ ઇત્યાદિગા-થાર્થસ્ય ।
કરિણીવૈધવ્યકરો મમ પુત્ર એકકાણ્ડવિનિપાતી ।
હતસ્નુષયા તથા કૃતો યથા કાણ્ડકરણ્ડકં વહતિ ॥

એવમાદિષ્વર્થેષુ સત્સ્વપ્યનાલીઢતૈવ ।
યથા વ્યઙ્ગ્યભેદસમાશ્રયેણ ધ્વનેઃ કાવ્યાર્થાનાં નવત્વમુત્પદ્યતે, તથા વ્યઞ્જકભેદસમાશ્રયેણાપિ । તત્તુ ગ્રન્થવિસ્તરભયાન્ન લિખ્યતે, સ્વયમેવ સહૃદયૈરભ્યૂહ્યમ્ । અત્ર ચ પુનઃપુનરુક્તમપિ સારતયેદમુચ્યતે —
વ્યઙ્ગ્યવ્યઞ્જકભાવેऽસ્મિન્વિવિધે સમ્ભવત્યપિ ।
રસાદિમય એકસ્મિન્ કવિઃ સ્યાદવધાનવાન્ ॥ ૫॥

અસ્મિન્નર્થાનન્ત્યહેતૌ વ્યઙ્ગ્યવ્યઞ્જકભાવે વિચિત્રે શબ્દાનાં સમ્ભવ-

ત્યપિ કવિરપૂર્વાર્થલાભાર્થી રસાદિમય એકસ્મિન્ વ્યઙ્ગ્યવ્યઞ્જકભાવે યત્નાદવદધીત । રસભાવતદાભાસરૂપે હિ વ્યઙ્ગ્યે તદ્વ્યઞ્જકેષુ ચ યથાનિર્દિષ્ટેષુ વર્ણપદવાક્યરચનાપ્રબન્ધેષ્વવહિતમનસઃ કવેઃ સર્વમપૂર્વં કાવ્યં સમ્પદ્યતે । તથા ચ રામાયણમહાભારતાદિષુ સઙ્ગ્રામાદયઃ પુનઃપુનરભિહિતા અપિ નવનવાઃ પ્રકાશન્તે । પ્રબન્ધે ચાઙ્ગી રસ એક એવોપનિબધ્યમાનોઽર્થવિશેષલાભં છાયાતિશયં ચ પુષ્ણાતિ । કસ્મિન્નિવેતિ ચેત્ — યથા રામાયણે યથા વા મહાભારતે । રામાયણે હિ કરુણો રસઃ સ્વયમાદિકવિના સૂત્રિતઃ શોકઃ શ્લોકત્વમાગતઃ ઇત્યેવંવાદિના । નિર્વ્યૂઢશ્ચ સ એવ સીતાત્યન્તવિયોગપર્યન્તમેવ સ્વપ્રબન્ધમુપરચયતા । મહાભારતેઽપિ શાસ્ત્રકાવ્યરૂપચ્છાયાન્વયિનિ વૃષ્ણિપાણ્ડવવિરસાવસાનવૈમનસ્યદાયિનીં સમાપ્તિમુપનિબધ્નતા મહામુનિના વૈરાગ્યજનનતાત્પર્યં પ્રાધાન્યેન સ્વપ્રબન્ધસ્ય દર્શયતા મોક્ષલક્ષણઃ પુરુષાર્થઃ શાન્તો રસશ્ચ મુખ્યતયા વિવક્ષાવિષયત્વેન સૂચિતઃ । એતચ્ચાંશેન વિવૃતમેવાન્યૈર્વ્યાખ્યાવિધાયિભિઃ । સ્વયમેવ ચૈતદુદ્ગીર્ણં તેનોદીર્ણમહામોહમગ્નમુજ્જિહીર્ષતા લોકમતિવિમલજ્ઞાનાલોકદાયિના લોકનાથેન —

યથા યથા વિપર્યેતિ લોકતન્ત્રમસારવત્ ।
તથા તથા વિરાગોઽત્ર જાયતે નાત્ર સંશયઃ ॥

ઇત્યાદિ બહુશઃ કથયતા । તતશ્ચ શાન્તો રસો રસાન્તરૈર્મોક્ષલક્ષણઃ પુરુષાર્થઃ પુરુષાર્થાન્તરૈસ્તદુપસર્જનત્વેનાનુગમ્યમાનોઽઙ્ગિત્વેન વિવક્ષાવિષય ઇતિ મહાભારતતાત્પર્યં સુવ્યક્તમેવાવભાસતે । અઙ્ગાઙ્ગિભાવશ્ચ યથા રસાનાં તથા પ્રતિપાદિતમેવ ।

પારમાર્થિકાન્તસ્તત્ત્વાનપેક્ષયા શરીરસ્યેવાઙ્ગભૂતસ્ય રસસ્ય પુરુષાર્થસ્ય ચ સ્વપ્રાધાન્યેન ચારુત્વમપ્યવિરુદ્ધમ્ । નનુ મહાભારતે યાવાન્વિવક્ષાવિષયઃ સોઽનુક્રમણ્યાં સર્વ એવાનુક્રાન્તો ન ચૈતત્તત્ર દૃશ્યતે, પ્રત્યુત સર્વપુરુષાર્થપ્રબોધહેતુત્વં સર્વરસગર્ભત્વં ચ મહાભારતસ્ય તસ્મિન્નુદ્દેશે સ્વશબ્દનિવેદિતત્વેન પ્રતીયતે । અત્રોચ્યતે — સત્યં શાન્તસ્યૈવ રસસ્યાઙ્ગિત્વં મહાભારતે મોક્ષસ્ય ચ સર્વપુરુષાર્થેભ્યઃ પ્રાધાન્યમિત્યેતન્ન સ્વશબ્દાભિધેયત્વેનાનુક્રમણ્યા દર્શિતમ્, દર્શિતં તુ વ્યઙ્ગ્યત્વેન —

ભગવાન્વાસુદેવશ્ચ કીર્ત્યતેઽત્ર સનાતનઃ

ઇત્યસ્મિન્ વાક્યે । અનેન હ્યયમર્થો વ્યઙ્ગ્યત્વેન વિવક્ષિતો યદત્ર મહાભારતે પાણ્ડવાદિચરિતં યત્કીર્ત્યતે તત્સર્વમવસાનવિરસમવિદ્યાપ્ર-

પઞ્ચરૂપઞ્ચ, પરમાર્થસત્યસ્વરૂપસ્તુ ભગવાન્વાસુદેવોઽત્ર કીર્ત્યતે ।
તસ્માત્તસ્મિન્નેવ પરમેશ્વરે ભગવતિ ભવત ભાવિતચેતસો, મા ભૂત વિભૂ-
તિષુ નિઃસારાસુ રાગિણો ગુણેષુ વા નયવિનયપરાક્રમાદિષ્વમીષુ કેવલેષુ
કેષુચિત્સર્વાત્મના પ્રતિનિવિષ્ટધિયઃ । તથા ચાગ્રે – પશ્યત નિઃસારતાં
સંસારસ્યેત્યમુમેવાર્થં દ્યોતયન્ સ્ફુટમેવાવભાસતે વ્યઞ્જકશક્ત્યનુગૃહીતશ્ચ
શબ્દઃ । એવંવિધમેવાર્થં ગર્ભીકૃતં સન્દર્શયન્તોઽનન્તરશ્લોકા લક્ષ્યન્તે –
સ હિ સત્યમ્ ઇત્યાદયઃ ।

અયં ચ નિગૂઢરમણીયોઽર્થો મહાભારતાવસાને હરિવંશવર્ણનેન
સમાપ્તિં વિદધતા તેનૈવ કવિવેધસા કૃષ્ણદ્વૈપાયનેન સમ્યક્સ્ફુટીકૃતઃ ।
અનેન ચાર્થેન સંસારાતીતે તત્ત્વાન્તરે ભક્ત્યતિશયં પ્રવર્તયતા સકલ
એવ સાંસારિકો વ્યવહારઃ પૂર્વપક્ષીકૃતો ન્યક્ષેણ પ્રકાશતે । દેવતાતીર્થ-
તપઃપ્રભૃતીનાં ચ પ્રભાવાતિશયવર્ણનં તસ્યૈવ પરબ્રહ્મણઃ પ્રાપ્ત્યુપાયત્વેન
તદ્વિભૂતિત્વેનૈવ દેવતાવિશેષાણામન્યેષાં ચ । પાણ્ડવાદિચરિતવર્ણન-
સ્યાપિ વૈરાગ્યજનનતાત્પર્યાદ્વૈરાગ્યસ્ય ચ મોક્ષમૂલત્વાન્મોક્ષસ્ય ચ
ભગવત્પ્રાપ્ત્યુપાયત્વેન મુખ્યતયા ગીતાદિષુ પ્રદર્શિતત્વાત્પરબ્રહ્મપ્રાપ્ત્યુ-
પાયત્વમેવ પરમ્પરયા । વાસુદેવાદિસઞ્જ્ઞાભિધેયત્વેન ચાપરિમિતશક્ત્યા-
સ્પદં પરં બ્રહ્મ ગીતાદિપ્રદેશાન્તરેષુ તદભિધાનત્વેન લબ્ધપ્રસિદ્ધિ માથુ-
રપ્રાદુર્ભાવાનુકૃતસકલસ્વરૂપં વિવક્ષિતં ન તુ માથુરપ્રાદુર્ભાવાંશ એવ,
સનાતનશબ્દવિશેષિતત્વાત્ । રામાયણાદિષુ ચાનયા સઞ્જ્ઞયા ભગવન્મૂ-
ર્ત્યન્તરે વ્યવહારદર્શનાત્ । નિર્ણીતશ્ચાયમર્થઃ શબ્દતત્ત્વવિદ્ભિરેવ ।

તદેવમનુક્રમણીનિર્દિષ્ટેન વાક્યેન ભગવદ્વ્યતિરેકિણઃ સર્વસ્યાન્ય-
સ્યાનિત્યતાં પ્રકાશયતા મોક્ષલક્ષણ એવૈકઃ પરઃ પુરુષાર્થઃ શાસ્ત્રનયે,
કાવ્યનયે ચ તૃષ્ણાક્ષયસુખપરિપોષલક્ષણઃ શાન્તો રસો મહાભારતસ્યા-
ઙ્ગિત્વેન વિવક્ષિત ઇતિ સુપ્રતિપાદિતમ્ । અત્યન્તસારભૂતત્વાચ્ચાયમર્થો
વ્યઙ્ગ્યત્વેનૈવ દર્શિતો ન તુ વાચ્યત્વેન । સારભૂતો હ્યર્થઃ સ્વશબ્દાનભિ-
ધેયત્વેન પ્રકાશિતઃ સુતરામેવ શોભામાવહતિ । પ્રસિદ્ધિશ્ચેયમસ્ત્યેવ
વિદગ્ધવિદ્વત્પરિષત્સુ યદભિમતતરં વસ્તુ વ્યઙ્ગ્યત્વેન પ્રકાશ્યતે ન
સાક્ષાચ્છબ્દવાચ્યત્વેન । તસ્માત્સ્થિતમેતત્ — અઙ્ગિભૂતરસાદ્યાશ્રયેણ
કાવ્યે ક્રિયમાણે નવાર્થલાભો ભવતિ બન્ધચ્છાયા ચ મહતી સમ્પદ્યત
ઇતિ । અત એવ ચ રસાનુગુણાર્થવિશેષોપનિબન્ધમલઙ્કારાન્તરવિરહેઽપિ
છાયાતિશયયોગિ લક્ષ્યે દૃશ્યતે । યથા —

મુનિર્જયતિ યોગીન્દ્રો મહાત્મા કુમ્ભસમ્ભવઃ ।
યેનૈકચુલકે દૃષ્ટૌ તૌ દિવ્યૌ મત્સ્યકચ્છપૌ ॥

ઇત્યાદૌ । અત્ર હ્યદ્ભુતરસાનુગુણમેકચુલકે મત્સ્યકચ્છપદર્શનં છાયાતિશયં પુષ્ણાતિ । તત્ર હ્યેકચુલકે સકલજલધિસન્નિધાનાદપિ દિવ્યમત્સ્યકચ્છપદર્શનમક્ષુણ્ણત્વાદદ્ભુતરસાનુગુણતરમ્ । ક્ષુણ્ણં હિ વસ્તુ લોકપ્રસિદ્ધ્યાદ્ભુતમપિ નાશ્ચર્યકારિ ભવતિ । ન ચાક્ષુણ્ણં વસ્તૂપ-નિબધ્યમાનમદ્ભુતરસસ્યૈવાનુગુણં યાવદ્રસાન્તરસ્યાપિ । તદ્યથા —
સ્વિદ્યતિ રોમાઞ્ચતે વેપતે રથ્યાયાન્તુલાગ્રેણ ।
સ પાર્શ્વોઽદ્યાપિ સુભગ તસ્યા યેનાસ્યતિક્રાન્તઃ ॥

એતદ્ગાથાર્થાદ્ભાવ્યમાનાદ્યા રસપ્રતીતિર્ભવતિ, સા ત્વાં સ્પૃષ્ટ્વા સ્વિદ્ય-તિ રોમાઞ્ચતે વેપતે ઇત્યેવંવિધાદર્થાત્પ્રતીયમાનાન્મનાગપિ નો જાયતે । તદેવં ધ્વનિપ્રભેદસમાશ્રયેણ યથા કાવ્યાર્થાનાં નવત્વં જાયતે તથા પ્રતિપાદિતમ્ । ગુણીભૂતવ્યઙ્ગ્યસ્યાપિ ત્રિભેદવ્યઙ્ગ્યાપેક્ષયા યે પ્રકારા-સ્તત્સમાશ્રયેણાપિ કાવ્યવસ્તૂનાં નવત્વં ભવત્યેવ । તત્ત્વતિવિસ્તારકા-રીતિ નોદાહૃતં સહૃદયૈઃ સ્વયમુત્પ્રેક્ષણીયમ્ ॥ ૫॥

ધ્વનેરિત્થં ગુણીભૂતવ્યઙ્ગ્યસ્ય ચ સમાશ્રયાત્ ।
ન કાવ્યાર્થવિરામોઽસ્તિ યદિ સ્યાત્પ્રતિભાગુણઃ ॥ ૬॥

સત્સ્વપિ પુરાતનકવિપ્રબન્ધેષુ યદિ સ્યાત્પ્રતિભાગુણઃ, તસ્મિંસ્ત્વ-સતિ ન કિઞ્ચિદેવ કવેર્વસ્ત્વસ્તિ । બન્ધચ્છાયાપ્યર્થદ્વયાનુરૂપશબ્દ-સન્નિવેશોઽર્થપ્રતિભાનાભાવે કથમુપપદ્યતે । અનપેક્ષિતાર્થવિશેષાક્ષરરચનૈવ બન્ધચ્છાયેતિ નેદં નેદીયઃ સહૃદયાનામ્ । એવં હિ સત્યર્થાનપેક્ષચતુર-મધુરવચનરચનાયામપિ કાવ્યવ્યપદેશઃ પ્રવર્તેત । શબ્દાર્થયોઃ સાહિત્યેન કાવ્યત્વે કથં તથાવિધે વિષયે કાવ્યવ્યવસ્થેતિ ચેત્ — પરોપનિબદ્ધાર્થ-વિરચને યથા તત્કાવ્યત્વવ્યવહારસ્તથા તથાવિધાનાં કાવ્યસન્દ-ર્ભાણામ્ ॥ ૬॥

ન ચાર્થાનન્ત્યં વ્યઙ્ગ્યાર્થાપેક્ષયૈવ યાવદ્વાચ્યાર્થાપેક્ષયાપીતિ
પ્રતિપાદયિતુમુચ્યતે —
અવસ્થાદેશકાલાદિવિશેષૈરપિ જાયતે ।
આનન્ત્યમેવ વાચ્યસ્ય શુદ્ધસ્યાપિ સ્વભાવતઃ ॥ ૭॥

શુદ્ધસ્યાનપેક્ષિતવ્યઙ્ગ્યસ્યાપિ વાચ્યસ્યાનન્ત્યમેવ જાયતે સ્વભા-

વતઃ । સ્વભાવો હ્યયં વાચ્યાનાં ચેતનાનામચેતનાનાં ચ યદવસ્થાભેદા-
દ્દેશભેદાત્કાલભેદાત્સ્વાલક્ષણ્યભેદાચ્ચાનન્તતા ભવતિ । તૈશ્ચ તથાવ્યવ-
સ્થિતૈઃ સદ્ભિઃ પ્રસિદ્ધાનેકસ્વભાવાનુસરણરૂપયા સ્વભાવોક્ત્યાપિ તાવ-
દુપનિબધ્યમાનૈર્નિરવધિઃ કાવ્યાર્થઃ સમ્પદ્યતે । તથા હ્યવસ્થાભેદાન્નવત્વં
યથા — ભગવતી પાર્વતી કુમારસમ્ભવે 'સર્વોપમાદ્રવ્યસમુચ્ચયેન' ઇત્યા-
દિભિરુક્તિભિઃ પ્રથમમેવ પરિસમાપિતરૂપવર્ણનાપિ પુનર્ભગવતઃ શમ્ભો-
ર્લોચનગોચરમાયાન્તી 'વસન્તપુષ્પાભરણં વહન્તી' મન્મથોપકરણભૂતેન
ભઙ્ગ્યન્તરેણોપવર્ણિતા । સૈવ ચ પુનર્નવોદ્વાહસમયે પ્રસાધ્યમાના 'તાં
પ્રાઙ્મુખીં તત્ર નિવેશ્ય તન્વીમ્' ઇત્યાદ્યુક્તિભિર્નવેનૈવ પ્રકારેણ નિરૂપિ-
તરૂપસૌષ્ઠવા । ન ચ તે તસ્ય કવેરેકત્રૈવાસકૃત્કૃતા વર્ણનપ્રકારા અપુન-
રુક્તત્વેન વા નવનવાર્થનિર્ભરત્વેન વા પ્રતિભાસન્તે । દર્શિતમેવ ચૈતદ્વિ-
ષમબાણલીલાયામ્ —

ન ચ તેષાં ઘટતેઽવધિઃ, ન ચ તે દૃશ્યન્તે કથમપિ પુનરુક્તાઃ ।
યે વિભ્રમાઃ પ્રિયાણામર્થા વા સુકવિવાણીનામ્ ॥

અયમપરશ્ચાવસ્થાભેદપ્રકારો યદચેતનાનાં સર્વેષાં ચેતનં દ્વિતીયં
રૂપમભિમાનિત્વપ્રસિદ્ધં હિમવદ્ગઙ્ગાદીનામ્ । તચ્ચોચિતચેતનવિષયસ્વરૂપ-
યોજનયોપનિબધ્યમાનમન્યદેવ સમ્પદ્યતે । યથા કુમારસમ્ભવ એવ
પર્વતસ્વરૂપસ્ય હિમવતો વર્ણનં, પુનઃ સપ્તર્ષિપ્રિયોક્તિષુ ચેતનતત્સ્વરૂપા-
પેક્ષયા પ્રદર્શિતં તદપૂર્વમેવ પ્રતિભાતિ । પ્રસિદ્ધશ્ચાયં સત્કવીનાં માર્ગઃ ।
ઇદં ચ પ્રસ્થાનં કવિવ્યુત્પત્તયે વિષમબાણલીલાયાં સપ્રપઞ્ચં દર્શિતમ્ ।
ચેતનાનાં ચ બાલ્યાદ્યવસ્થાભિરન્યત્વં સત્કવીનાં પ્રસિદ્ધમેવ । ચેતના-
નામવસ્થાભેદેઽપ્યવાન્તરાવસ્થાભેદાન્નાનાત્વમ્ । યથા કુમારીણાં કુસુમ-
શરભિન્નહૃદયાનામન્યાસાં ચ । તત્રાપિ વિનીતાનામવિનીતાનાં ચ ।
અચેતનાનાં ચ ભાવાનામારમ્ભાદ્યવસ્થાભેદભિન્નાનામેકૈકશઃ સ્વરૂપમુપ-
નિબધ્યમાનમાનન્ત્યમેવોપયાતિ । યથા —

હંસાનાં નિનદેષુ યૈઃ કવલિતૈરાસજ્યતે કૂજતા-
મન્યઃ કોઽપિ કષાયકણ્ઠલુઠનાદાઘર્ઘરો વિભ્રમઃ ।
તે સમ્પ્રત્યકઠોરવારણવધૂદન્તાઙ્કુરસ્પર્ધિનો
નિર્યાતાઃ કમલાકરેષુ બિસિનીકન્દાગ્રિમગ્રન્થયઃ ॥

એવમન્યત્રાપિ દિશાનયાનુસર્તવ્યમ્ ।

દેશભેદાન્નાનાત્વમચેતનાનાં તાવત્ । યથા વાયૂનાં નાનાદિગ્દેશ-ચારિણામન્યેષામપિ સલિલકુસુમાદીનાં પ્રસિદ્ધમેવ । ચેતનાનામપિ માનુષપશુપક્ષિપ્રભૃતીનાં ગ્રામારણ્યસલિલાદિસમેધિતાનાં પરસ્પરં મહા-ન્વિશેષઃ સમુપલક્ષ્યત એવ । સ ચ વિવિચ્ય યથાયથમુપનિબધ્યમાન-સ્તથૈવાનન્ત્યમાયાતિ । તથા હિ — માનુષાણામેવ તાવદ્દિગ્દેશાદિ-ભિન્નાનાં યે વ્યવહારવ્યાપારાદિષુ વિચિત્રા વિશેષાસ્તેષાં કેનાન્તઃ શક્યતે ગન્તુમ્, વિશેષતો યોષિતામ્ । ઉપનિબધ્યતે ચ તત્સર્વમેવ સુકવિભિર્યથાપ્રતિભમ્ ।

કાલભેદાચ્ચ નાનાત્વમ્ । યથર્તુભેદાદ્દિગ્વ્યોમસલિલાદીનામચેતના-નામ્ । ચેતનાનાં ચૌત્સુક્યાદયઃ કાલવિશેષાશ્રયિણઃ પ્રસિદ્ધા એવ । સ્વાલક્ષણ્યપ્રભેદાચ્ચ સકલજગદ્ગતાનાં વસ્તૂનાં વિનિબન્ધનં પ્રસિદ્ધમેવ । તચ્ચ યથાવસ્થિતમપિ તાવદુપનિબધ્યમાનમનન્તતામેવ કાવ્યાર્થ-સ્યાપાદયતિ ।

અત્ર કેચિદાચક્ષીરન્ — યથા સામાન્યાત્મના વસ્તૂનિ વાચ્યતાં પ્રતિપદ્યન્તે ન વિશેષાત્મના ; તાનિ હિ સ્વયમનુભૂતાનાં સુખાદીનાં તન્નિમિત્તાનાં ચ સ્વરૂપમન્યત્રારોપયદ્ભિઃ સ્વપરાનુભૂતરૂપસામાન્ય-માત્રાશ્રયેણોપનિબધ્યન્તે કવિભિઃ । ન હિ તૈરતીતમનાગતં વર્તમાનઞ્ચ પરિચિતાદિસ્વલક્ષણં યોગિભિરિવ પ્રત્યક્ષીક્રિયતે ; તચ્ચાનુભાવ્યાનુ-ભવસામાન્યં સર્વપ્રતિપત્તૃસાધારણં પરિમિતત્વાત્પુરાતનાનામેવ ગોચરી-ભૂતમ્, તસ્યાવિષયત્વાનુપપત્તેઃ । અત એવ સ પ્રકારવિશેષો યૈરદ્યતનૈ-રભિનવત્વેન પ્રતીયતે તેષામભિમાનમાત્રમેવ ભણિતિકૃતં વૈચિત્ર્યમાત્રમ-ત્રાસ્તીતિ ।

તત્રોચ્યતે — યત્તૂક્તં સામાન્યમાત્રાશ્રયેણ કાવ્યપ્રવૃત્તિસ્તસ્ય ચ પરિમિતત્વેન પ્રાગેવ ગોચરીકૃતત્વાન્નાસ્તિ નવત્વં કાવ્યવસ્તૂનામિતિ, તદયુક્તમ્ ; યતો યદિ સામાન્યમાત્રમાશ્રિત્ય કાવ્યં પ્રવર્તતે કિઙ્કૃત-સ્તર્હિ મહાકવિનિબધ્યમાનાનાં કાવ્યાર્થાનામતિશયઃ । વાલ્મીકિવ્ય-તિરિક્તસ્યાન્યસ્ય કવિવ્યપદેશ એવ વા સામાન્યવ્યતિરિક્તસ્યા-ન્યસ્ય કાવ્યાર્થસ્યાભાવાત્, સામાન્યસ્ય ચાદિકવિનૈવ પ્રદર્શિત-ત્વાત્ । ઉક્તિવૈચિત્ર્યાન્નૈષ દોષ ઇતિ ચેત્ — કિમિદમુક્તિવૈચિત્ર્યમ્ ? ઉક્તિર્હિ વાચ્યવિશેષપ્રતિપાદિ વચનમ્ । તદ્વૈચિત્ર્યે કથં ન વાચ્યવૈ-ચિત્ર્યમ્ । વાચ્યવાચકયોરવિનાભાવેન પ્રવૃત્તેઃ । વાચ્યાનાં ચ કાવ્યે-પ્રતિભાસમાનાનાં યદ્રૂપં તત્તુ ગ્રાહ્યવિશેષાભેદેનૈવ પ્રતીયતે । તેનો-

ક્તિવૈચિત્ર્યવાદિના વાચ્યવૈચિત્ર્યમનિચ્છતાપ્યવશ્યમેવાભ્યુપગન્તવ્યમ્ ।
તદયમત્ર સઙ્ક્ષેપઃ —
વાલ્મીકિવ્યતિરિક્તસ્ય યદ્યેકસ્યાપિ કસ્યચિત્ ।
ઇષ્યતે પ્રતિભાર્થેષુ તત્તદાનન્ત્યમક્ષયમ્ ॥

કિઞ્ચ, ઉક્તિવૈચિત્ર્યં યત્કાવ્યનવત્વે નિબન્ધનમુચ્યતે તદસ્મત્પક્ષાનુગુણમેવ । યતો યાવાનયં કાવ્યાર્થાનન્ત્યભેદહેતુઃ પ્રકારઃ પ્રાગ્દર્શિતઃ સ સર્વ એવ પુનરુક્તિવૈચિત્ર્યાદ્ દ્વિગુણતામાપદ્યતે । યશ્ચાયમુપમાશ્લેષાદિરલઙ્કારવર્ગઃ પ્રસિદ્ધઃ સ ભણિતિવૈચિત્ર્યાદુપનિબધ્યમાનઃ સ્વયમેવાનવધિર્ધત્તે પુનઃ શતશાખતામ્। ભણિતિશ્ચ સ્વભાષાભેદેન વ્યવસ્થિતા સતી પ્રતિનિયતભાષાગોચરાર્થવૈચિત્ર્યનિબન્ધનં પુનરપરં કાવ્યાર્થાનામાનન્ત્યમાપાદયતિ । યથા મમૈવ —
મમ મમ ઇતિ ભણતો વ્રજતિ કાલો જનસ્ય ।
તથાપિ ન દેવો જનાર્દનો ગોચરો ભવતિ મનસઃ ॥ ૭॥

ઇત્થં યથા યથા નિરૂપ્યતે તથા તથા ન લભ્યતેઽન્તઃ કાવ્યાર્થાનામ્ । ઇદં તૂચ્યતે —
અવસ્થાદિવિભિન્નાનાં વાચ્યાનાં વિનિબન્ધનમ્ ।
યત્પ્રદર્શિતં પ્રાક્
ભૂમ્નૈવ દૃશ્યતે લક્ષ્યે –
ન તચ્છક્યમપોહિતુમ્ ।
– તત્તુ ભાતિ રસાશ્રયાત્ ॥ ૮॥

તદિદમત્ર સઙ્ક્ષેપેણાભિધીયતે સત્કવીનામુપદેશાય —
રસભાવાદિસમ્બદ્ધા યદ્યૌચિત્યાનુસારિણી ।
અન્વીયતે વસ્તુગતિર્દેશકાલાદિભેદિની ॥ ૯॥

તત્કા ગણના કવીનામન્યેષાં પરિમિતશક્તીનામ્ ।
વાચસ્પતિસહસ્રાણાં સહસ્રૈરપિ યત્નતઃ ।
નિબદ્ધા સા ક્ષયં નૈતિ પ્રકૃતિર્જગતામિવ ॥ ૧૦॥

યથા હિ જગત્પ્રકૃતિરતીતકલ્પપરમ્પરાવિર્ભૂતવિચિત્રવસ્તુપ્રપઞ્ચા સતી પુનરિદાનીં પરિક્ષીણા પરપદાર્થનિર્માણશક્તિરિતિ ન શક્યતેઽભિધાતુમ્ । તદ્વદેવેયં કાવ્યસ્થિતિરનન્તાભિઃ કવિમતિભિરુપભુક્તાપિ નેદાનીં પરિહીયતે, પ્રત્યુત નવનવાભિર્વ્યુત્પત્તિભિઃ પરિવર્ધતે । ઇત્થં

સ્થિતેઽપિ
સંવાદાસ્તુ ભવન્ત્યેવ બાહુલ્યેન સુમેધસામ્ ।
સ્થિતં હ્યેતત્ સંવાદિન્ય એવ મેધાવિનાં બુદ્ધયઃ । કિન્તુ —
નૈકરૂપતયા સર્વે તે મન્તવ્યા વિપશ્ચિતા ॥ ૧૧॥

કથમિતિ ચેત્ —
સંવાદો હ્યન્યસાદૃશ્યં તત્પુનઃ પ્રતિબિમ્બવત્ ।
આલેખ્યાકારવત્તુલ્યદેહિવચ્ચ શરીરિણામ્ ॥ ૧૨॥

સંવાદો હિ કાવ્યાર્થસ્યોચ્યતે યદન્યેન કાવ્યવસ્તુના સાદૃશ્યમ્ । તત્પુનઃ શરીરિણાં પ્રતિબિમ્બવદાલેખ્યાકારવત્તુલ્યદેહિવચ્ચ ત્રિધા વ્યવસ્થિતમ્ । કિઞ્ચિદ્ધિ કાવ્યવસ્તુ વસ્ત્વન્તરસ્ય શરીરિણઃ પ્રતિબિમ્બકલ્પમ્, અન્યદાલેખ્યપ્રખ્યમ્, અન્યત્તુલ્યેન શરીરિણા સદૃશમ્ ।
તત્ર પૂર્વમનન્યાત્મ તુચ્છાત્મ તદનન્તરમ્ ।
તૃતીયં તુ પ્રસિદ્ધાત્મ નાન્યસામ્યં ત્યજેત્કવિઃ ॥ ૧૩॥

તત્ર પૂર્વં પ્રતિબિમ્બકલ્પં કાવ્યવસ્તુ પરિહર્તવ્યં સુમતિના । યત-સ્તદનન્યાત્મ તાત્ત્વિકશરીરશૂન્યમ્ । તદનન્તરમાલેખ્યપ્રખ્યમન્યસામ્યં શરીરાન્તરયુક્તમપિ તુચ્છાત્મત્વેન ત્યક્તવ્યમ્ । તૃતીયં તુ વિભિન્નકમ-નીયશરીરસદ્ભાવે સતિ સસંવાદમપિ કાવ્યવસ્તુ ન ત્યક્તવ્યં કવિના । ન હિ શરીરી શરીરિણાન્યેન સદૃશોઽપ્યેક એવેતિ શક્યતે વક્તુમ્ ॥ ૧૩॥

એતદેવોપપાદયિતુમુચ્યતે —
આત્મનોઽન્યસ્ય સદ્ભાવે પૂર્વસ્થિત્યનુયાય્યપિ ।
વસ્તુ ભાતિતરાં તન્વ્યાઃ શશિચ્છાયમિવાનનમ્ ॥ ૧૪॥

તત્ત્વસ્ય સારભૂતસ્યાત્મનઃ સદ્ભાવેઽન્યસ્ય પૂર્વસ્થિત્યનુયાય્યપિ વસ્તુ ભાતિતરામ્ । પુરાણરમણીયચ્છાયાનુગૃહીતં હિ વસ્તુ શરીરવત્પરાં શોભાં પુષ્યતિ । ન તુ પુનરુક્તત્વેનાવભાસતે । તન્વ્યાઃ શશિચ્છાયમિ-વાનનમ્ ।
એવં તાવત્સસંવાદાનાં સમુદાયરૂપાણાં વાક્યાર્થાનાં વિભક્તાઃ સી-માનઃ । પદાર્થરૂપાણાં ચ વસ્ત્વન્તરસદૃશાનાં કાવ્યવસ્તૂનાં નાસ્ત્યેવ દોષ ઇતિ પ્રતિપાદયિતુમુચ્યતે —
અક્ષરાદિરચનેવ યોજ્યતે યત્ર વસ્તુરચના પુરાતની ।

નૂતને સ્ફુરતિ કાવ્યવસ્તુનિ વ્યક્તમેવ ખલુ સા ન દુષ્યતિ ॥ ૧૫॥

ન હિ વાચસ્પતિનાપ્યક્ષરાણિ પદાનિ વા કાનિચિદપૂર્વાણિ ઘટ-
યિતું શક્યન્તે । તાનિ તુ તાન્યેવોપનિબદ્ધાનિ ન કાવ્યાદિષુ નવતાં
વિરુધ્યન્તિ । તથૈવ પદાર્થરૂપાણિ શ્લેષાદિમયાન્યર્થતત્ત્વાનિ ।

તસ્માત્ –
યદપિ તદપિ રમ્યં યત્ર લોકસ્ય કિઞ્ચિત્-
સ્ફુરિતમિદમિતીયં બુદ્ધિરભ્યુજ્જિહીતે ।
સ્ફુરણેયં કાચિદિતિ સહૃદયાનાં ચમત્કૃતિરુત્પદ્યતે ।
અનુગતમપિ પૂર્વચ્છાયયા વસ્તુ તાદૃક્
સુકવિરુપનિબધ્નન્નિન્દ્યતાં નોપયાતિ ॥ ૧૬॥

તદનુગતમપિ પૂર્વચ્છાયયા વસ્તુ તાદૃક્ તાદૃક્ષં સુકવિર્વિવક્ષિતવ્ય-
ઙ્ગ્યવાચ્યાર્થસમર્પણસમર્થશબ્દરચનારૂપયા બન્ધચ્છાયયોપનિબધ્નન્નિન્દ્યતાં
નૈવ યાતિ । તદિત્થં સ્થિતમ્ —
પ્રતીયન્તાં વાચો નિમિતવિવિધાર્થામૃતરસા
ન સાદઃ કર્તવ્યઃ કવિભિરનવદ્યે સ્વવિષયે ।
સન્તિ નવાઃ કાવ્યાર્થાઃ પરોપનિબદ્ધાર્થવિરચને ન કશ્ચિત્કવેર્ગુણ
ઇતિ ભાવયિત્વા ।
પરસ્વાદાનેચ્છાવિરતમનસો વસ્તુ સુકવેઃ
સરસ્વત્યેવૈષા ઘટયતિ યથેષ્ટં ભગવતી ॥ ૧૭॥

પરસ્વાદાનેચ્છાવિરતમનસઃ સુકવેઃ સરસ્વત્યેષા ભગવતી યથેષ્ટં
ઘટયતિ વસ્તુ । યેષાં સુકવીનાં પ્રાક્તનપુણ્યાભ્યાસપરિપાકવશેન
પ્રવૃત્તિસ્તેષાં પરોપરચિતાર્થપરિગ્રહનિઃસ્પૃહાણાં સ્વવ્યાપારો ન ક્વચિદુ-
પયુજ્યતે । સૈવ ભગવતી સરસ્વતી સ્વયમભિમતમર્થમાવિર્ભાવયતિ ।
એતદેવ હિ મહાકવિત્વં મહાકવીનામિત્યોમ્ ।

ઇત્યક્લિષ્ટરસાશ્રયોચિતગુણાલઙ્કારશોભાભૃતો
યસ્માદ્વસ્તુ સમીહિતં સુકૃતિભિઃ સર્વં સમાસાદ્યતે ।
કાવ્યાખ્યેઽખિલસૌખ્યધામ્નિ વિબુધોદ્યાને ધ્વનિર્દર્શિતઃ
સોઽયં કલ્પતરૂપમાનમહિમા ભોગ્યોઽસ્તુ ભવ્યાત્મનામ્ ॥

સત્કાવ્યતત્ત્વનયવર્ત્મચિરપ્રસુપ્ત
કલ્પં મનસ્સુ પરિપક્વધિયાં યદાસીત્ ।

તદ્વ્યાકરોત્સહૃદયોદયલાભહેતો-
રાનન્દવર્ધન ઇતિ પ્રથિતાભિધાનઃ ॥

ઇતિ શ્રીરાજાનકાનન્દવર્ધનાચાર્યવિરચિતે ધ્વન્યાલોકે ચતુર્થ ઉદ્દ્યોતઃ ।

---

Encoded by Rajani Arjun Shankar rajani_arjun@yahoo.com

---

*dhvanyAlokaH 4*

pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*